# वंदनम्



ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो

वंशऋषिभ्यो महद्भ्यो नमो गुरुभ्यः।

सर्वोप्लवरहित-प्रज्ञानघन-प्रत्यगर्थो ब्रह्मैवाहमस्मि

ॐ नारायणं पद्मभवं वशिष्ठं शक्तिं च तत्पुत्रपराशरं च

व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्।

श्रीशङ्कराचार्यमथास्य पद्म-पादं च हस्तामलकं च शिष्यम्

तं तोटकं वार्तिककारमन्या-नस्मद्गुरुन् संततमानतोऽस्मि॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।

नमामि भगवत्पादं शङ्करं लोकशङ्करम्॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम्।

सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने।

व्योमवद्-व्याप्तदेहाय दक्षिणामूर्तये नमः॥